# Brahmakritam Vamana Stotram

# ब्रह्मकृतं वामनस्तोत्रम्

## Document Information

Text title : Brahmakritam Vamana Stotram

File name : vAmanastotraMbrahmakRRitam.itx

Category : vishhnu, stotra, dashAvatAra

Location : doc_vishhnu

Proofread by : PSA Easwaran

Description/comments : from Vishnudharma Upapurana. Adhyaya 76

Latest update : December 25, 2021

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 25, 2021

*sanskritdocuments.org*

# ब्रह्मकृतं वामनस्तोत्रम्

तं जातमात्रं भगवान्ब्रह्मा लोकपितामहः ।
जातकर्मादिकाः कृत्वा क्रियास्तुष्टाव पार्थिव ॥ ६७॥

ब्रह्मोवाच -
जयाद्येश जयाजेय जय सर्वात्मकात्मक ।
जय जन्मजरापेत जयानन्त जयाच्युत ॥ ६८॥

जयाजित जयाशेष जयाव्यक्तस्थिते जय ।
परमार्थार्थ सर्वज्ञ ज्ञानज्ञेयात्मनिःसृत ॥ ६९॥

जयाशेषजगत्साक्षिञ्जय कर्तर्जगद्गुरो ।
जगतो जगदन्तेऽन्तःस्थितौ पालयिता जय ॥ ७०॥

जयाखिल जयाशेष जयाखिलहृदि स्थित ।
जयादिमध्यान्तमय सर्वज्ञानमयोत्तम ॥ ७१॥

मुमुक्षुभिरनिर्देश्य स्वयन्दृष्ट जयेश्वर ।
योगिभिर्मुक्तिफलद दमादिगुणभूषणैः ॥ ७२॥

जयातिसूक्ष्म दुर्ज्ञेय जगत्स्थूल जगन्मय ।
जय स्थूलातिसूक्ष्म त्वं जयातीन्द्रिय सेन्द्रिय ॥ ७३॥

जय स्वमाया योगस्थ शेषभोगशयाक्षर ।
जयैकदंष्ट्राप्रान्तान्त समुद्धृतवसुन्धर ॥ ७४॥

नृकेसरिञ्जयारातिवक्षःस्थलविदारण ।
साम्प्रतं जय विश्वात्मन्मायावामन केशव ॥ ७५॥

निजमायापटच्छन्न जगद्धातर्जनार्दन ।
जयाचिन्त्य जयानेकस्वरूपैकविध प्रभो ॥ ७६॥

वर्धस्व वर्धितानेकविकारप्रकृते हरे ।

त्वय्येषा जगतामीश संस्थिता धर्मपद्धतिः ॥ ७७॥

न त्वामहं न चेशानो नेन्द्राद्यास्त्रिदशा हरे ।
ज्ञातुमीशा न मुनयः सनकाद्या न योगिनः ॥ ७८॥

त्वन्मायापटसंवीते जगत्यत्र जगत्पते ।
कस्त्वां वेत्स्यति सर्वेशं त्वत्प्रसादं विना नरः ॥ ७९॥

त्वमेवाराधितो यस्य प्रसादसुमुखः प्रभो ।
स एव केवलं देव वेत्ति त्वां नेतरो जनः ॥ ८०॥

तदीश्वरेश्वरेशान विभो वर्धस्व भावन ।
प्रभावायास्य विश्वस्य विश्वात्मन्पृथुलोचन ॥ ८१॥

इति विष्णुधर्मेषु षड्सप्ततितमोऽध्यायान्तर्गतं
ब्रह्मकृतं वामनस्तोत्रं सम्पूर्णम् ।

Proofread by PSA Easwaran

*Brahmakritam Vamana Stotram*

pdf was typeset on December 25, 2021

Please send corrections to *sanskrit@cheerful.com*